# ६. पादुका सहस्रम् - अधिकार परिग्रह पद्धतिः (४०)

अधीष्टे पादुका सा मे यस्याः साकेतवासिभिः ।
अन्वय व्यतिरेकाभ्या मन्वमीयत वैभवम् ॥ ६.१॥ १४१॥

मोचित स्थिरचरा नयन्नतः कोसलान् जनपदा नुपास्महे ।
येषु कांश्चन बभूव वत्सरान् दैवतं दनुजवैरि पादुका ॥ ६.२॥ १४२॥

साम्राज्य सम्पदिव दासज नोचिता त्वं
रामेण सत्य वचसा भरताय दत्ता ।
स त्वां निवेश्य चरणावनि भद्रपीठे
पृथ्वीं बुभोज बुभुजे च यशो विभूतिम् ॥ ६.३॥ १४३॥

भोगा ननन्य मनसां मणिपादुके त्वं
पुष्णासि हन्त भजना मनुषङ्ग सिद्धान् ।
तेनैव नून मभव द्भरतस्य साधोः
अप्रार्थितं तदिह राज्य मवर्जनीयम् ॥ ६.४॥ १४४॥

राम प्रयाण जनितं व्यपनीय शोकं
रत्नासने स्थितवती मणिपादरक्षे ।
पृथ्वीं निजेन यशसा विहितोत्तरीयां
एकातपत्र तिलकां भवती वितेने ॥ ६.५॥ १४५॥

रामाज्ञया परवती परिगृह्य राज्यं
रत्नासनं रघुकुलोचित माश्रयन्ती ।
शुद्धां पदावनि पुनर्भवती वितेने
स्वातन्त्र्य लेश कलुषां भरतस्य कीर्तिम् ॥ ६.६॥ १४६॥

पौलस्त्य वीर वदन स्तबकावसानात्
पुष्पाणि दण्डकवनेष्व पचेतु मिच्छोः ।
रक्षाधुरं धृतवती मणिपादुके त्वं
रामस्य मैथिल सुता सहिते प्रचारे ॥ ६.७॥ १४७॥

पादावनि प्रचल चामर वृन्द मध्ये
भद्रासनास्तर गता भवती विरेजे ।
आकीर्ण दिव्य सलिले कटके सुमेरोः
अम्भोजिनीव कलहायित हंसयूथा ॥ ६.८॥ १४८॥

मान्ये रघूद्वहपदे मणिपादुके त्वां
विन्यस्य विग्रहवती मिव राज्यलक्ष्मीम् ।
आलोल मक्षवलयी भरतो जटावान्
आलम्ब्य चामर मनन्य मनाः सिषेवे ॥ ६.९॥ १४९॥

प्राप्ते दिवं दशरथे भरते विलक्षे

पर्याकुलेषु वृष मुत्तरकोसलेषु ।
त्वं चेदुपेक्षितवती क इवाभविष्यत्
गोपायितुं गुह सखस्य विभोः पदं तत् ॥ ६.१०॥ १५०॥

भ्रातुर्यदम्ब विरहाद्धरते विषण्णे
दाक्षिण्य माश्रितवती मणिपादुके त्वम् ।
आसी दशेष जगतां श्रवणामृतं तत्
वाचाल काहलसहं बिरुदं तदा ते ॥ ६.११॥ १५१॥

राज्यं तदा दशरथा दनु रामतः प्राक्
बिभ्राणया चरण रक्षिणि वीतखेदम् ।
तुल्याधिकार भजनेन बभूव धन्यो
वंशस्त्वयाऽम्ब मनुवंश महीपतीनाम् ॥ ६.१२॥ १५२॥

वर्षाणि तानि वृषलो न तपांसि तेपे
बालो न कश्चिदपि मृत्युवशं जगाम ।
राज्ये तवाम्ब रघु पुङ्गव पादरक्षे
नैवापरं प्रतिविधेय मभूत्प्रसक्तम् ॥ ६.१३॥ १५३॥

विश्वं त्वदाश्रित पदाम्बुज सम्भवायां
यस्यां प्रतिष्ठित मिदं मणिपादरक्षे ।
आसी दनन्य शरणा समये यथावत्

साऽपि त्वया वसुमती विहित प्रतिष्ठा ॥ ६.१४॥ १५४॥

प्रायेण राम विरह व्यथिता तदानीं
उत्सङ्ग माश्रितवती तव राज्यलक्ष्मीः ।
तामेव देवि ननु जीवयितुं जलार्द्रां
अङ्गीचकार भवती भरतोपनीताम् ॥ ६.१५॥ १५५॥

वीरव्रत प्रणयिनि प्रथमे रघूणां
प्राप्ते चिराय भरते व्रतमासिधारम् ।
त्यक्त्वा पदावनि तदा विविधान् विहारान्
एकासिका व्रत मपूर्व मवर्तयस्त्वम् ॥ ६.१६॥ १५६॥

काकुत्स्थ पाद विरह प्रतिपन्न मौनां
निष्पन्दता मुपगतां मणिपादरक्षे ।
आश्वासय न्निव मुहु र्भरतस्तदानीं
शीतै रवीजयत चामर मारुतैस्त्वाम् ॥ ६.१७॥ १५७॥

यत्र क्वचिद्विहरतोऽपि पदारविन्दं
रक्ष्यं मया रघुपते रिति भावयन्त्या ।
निश्शेषमेव सहसा मणिपादरक्षे
निष्कण्टकं जगदिदं विदधे भवत्या ॥ ६.१८॥ १५८॥

रामं त्वया विरहितं भरतं च तेन
त्रातुं पदावनि तदा यदभूत्प्रतीतम् ।
रामानुजस्य तव चाम्ब जगत्समस्तं
जागर्ति तेन खलु जागरण व्रतेन ॥ ६.१९॥ १५९॥

अन्तःपुरे परिजनैः समयोपयातैः
अभ्यर्चिता भवसि या विनयोपपन्नैः ।
सा कोसलेश्वर पदावनि भूपतीनां
सङ्घट्टनं मकुट पङ्क्तिभि रन्वभूस्त्वम् ॥ ६.२०॥ १६०॥

प्राप्याधिकार मुचितं भुवनस्य गुप्त्यै
भद्रासनं भरत वन्दित माश्रयन्त्या ।
मध्येऽवतीर्ण मिव माधव पादरक्षे
मातस्त्वयाऽपि मनुवंश महीपतीनाम् ॥ ६.२१॥ १६१॥

राजासने रघुकुलोद्वह पादरक्षे
नीराजनं समभवत् समयोचितं ते ।
श्लाघावशेन बहुशः परिघूर्णिताभिः
सामन्त मौलि मणिमङ्गल दीपिकाभिः ॥ ६.२२॥ १६२॥

पृथ्वी पतीनां युगपत् किरीटाः
प्रत्यर्थिनां प्राणितु मर्थिनां च ।

प्रापुस्तदा राघव पादरक्षे
त्वदीय मास्थानिक पादपीठम् ॥ ६.२३॥ १६३॥

प्रणम्य रङ्गेश्वर पादरक्षे
दूरोपनीतै रुपदाविशेषैः ।
सभाजयन्ति स्म तदा सभायां
उच्चैस्तरा मुत्तरकोसला स्त्वाम् ॥ ६.२४॥ १६४॥

अपावृत द्वार मयन्त्रिताश्वं
रङ्गेश पादावनि पूर्व मासीत् ।
त्वया यदृच्छा सुख सुप्त पान्थं
रामे वनस्थेऽपि पदं रघूणाम् ॥ ६.२५॥ १६५॥

अनन्य भक्ति र्मणिपादुके त्वां अभ्यर्चयन् दाशरथि र्द्वितीयः ।
विकल्प्यमानःप्रथमेन कीर्त्या वन्द्यः स्वयं व्योमसदां बभूव ॥ ६.२६॥१६६॥

अरण्य योग्यं पदमस्पृशन्ती रामस्य राजार्हपदे निविष्टा ।
आस्थान नित्यासिकया निरास्थःस्वर्गौकसां स्वैरगते र्विघातम्॥६.२७॥ १६७

राजासने चेद्भवती निषण्णा रङ्गेश पादावनि तन्न चित्रम् ।
यत्राधिरूढाः क्रमशः पुरा त्वां उत्तंसयन्ते रघुसार्वभौमाः ॥ ६.२८॥ १६८॥

भद्रासनं चेत्परिवृत्त मासीत् देवि क्षणं दक्षिणतो मुखं ते ।
कथं भवेत् काञ्चन पादरक्षे रामस्य रक्षोमृगया विहारः ॥ ६.२९॥ १६९॥

यावत्त्वया राघव पादरक्षे जिगीषिता राक्षस राजधानी ।
मालेव तावल्लुलिता मदान्धै रुद्यान शाखामृग यूथपैस्ते ॥ ६.३०॥ १७०॥

महीक्षितां राघव पादरक्षे भद्रासनस्थां भवतीं स्पृशन्तः ।
पूर्वं तथात्वे नियतेऽपि भूयः कल्याणता मानशिरे किरीटाः ॥ ६.३१॥ १७१॥

अनिच्छतः पाण्डर मातपत्रं पित्रा वितीर्णं मणिपादरक्षे ।
आसीत् त्वदर्थं विधृतेन तेन छाया समग्रा भरतस्य मौलौ ॥ ६.३२॥ १७२॥

पादुके रघुपतौ यदृच्छया प्रस्थिते वन विहार कौतुकात् ।
आधिराज्य मधिगम्यते युवा मक्षतं वसुमती मरक्षतम् ॥ ६.३३॥ १७३॥

रघुवीर पदानुषङ्ग मात्रात् परिबर्हेषु निवेशिता यदि त्वम् ।
अधिकारदिने कथं पुनस्ते परिवारास्तव पादुके बभूवुः ॥ ६.३४॥ १७४॥

पुरुषार्थ चतुष्ट यार्थिनीनां परिषत् ते महिता वसिष्ठ मुख्यैः ।
क्रयविक्रय पट्टणं प्रजाना मभवत् काञ्चनपादुके तदानीम् ॥ ६.३५॥ १७५॥

मनुजत्व तिरोहितेन शक्ये वपुषैकेन विरोधिनां निरासे ।

अभजद्भरतादि भेदमीशः स्वयमाराधयितुं पदावनि त्वाम् ॥ ६.३६॥ १७६॥

मगधाङ्ग कलिङ्ग वङ्ग मुख्यान्
विमतान् रन्ध्र गवेषिणः ससैन्यान् ।
रघुपुङ्गव पादुके विजिग्ये
भरतः शासन मुद्वहन् भवत्याः ॥ ६.३७॥ १७७॥

अनितर वहनीयं मन्त्रि मुख्यै र्यदा तत्
त्वयि विनिहित मासीत् सूर्यवंशाधि राज्यम् ।
रघुपति पदरक्षे रत्नपीठे तदानीं
श्रियमिव ददृशुस्त्वां सादरं लोकपालाः ॥ ६.३८॥ १७८॥

परिहृत दण्डकाध्व गमनं पदरक्षिणि तत्
परिणत विश्व सम्प दुदयं युवयो र्द्वितयम् ।
रघुपति रत्नपीठ मधिरुह्य तदा विदधे
व्यपगत वैरिभूप निलयं वसुधा वलयम् ॥ ६.३९॥ १७९॥

प्राप्तोदया तदानीं किमपि तमस्तन्निराक रोद्भवती ।
तनुरिव मनुकुल जनुषां प्रसवित्री रत्नपादुके सवितुः ॥ ६.४०॥ १८०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे

अधिकार परिग्रह पद्धतिः षष्ठी ॥